# अथ सिद्धांतरहस्यम् ।

श्रीकृष्णाय नमः ।

श्रावणस्यामले पक्षे एकादश्या महानिशि ।
साक्षाद्भगवता प्रोक्तं तदक्षरश उच्यते ॥ १ ॥
ब्रह्मसंबंधकरणात्सर्वेषां देहजीवयोः ।
सर्वदोषनिवृत्तिर्हि दोषाः पंचविधाः स्मृताः ॥ २ ॥
सहजा देशकालोत्था लोकवेदनिरूपिताः ।
संयोगजाः स्पर्शजाश्च न मंतव्याः कथं च न ॥ ३ ॥
अन्यथा सर्वदोषाणां न निवृत्तिः कथं च न ।
असमर्पितवस्तूनां तस्माद्वर्जनमाचरेत् ॥ ४ ॥
निवेदिभिः समर्प्यैव सर्वं कुर्यादिति स्थितिः ।
न मतं देवदेवस्य सामिभुक्तसमर्पणम् ॥ ५ ॥
तस्मादादौ सर्वकार्ये सर्ववस्तुसमर्पणम् ।
दत्तापहारवचनं तथा च सकलं हरेः ॥ ६ ॥
न ग्राह्यमिति वाक्यं हि भिन्नमार्गपरं मतम् ।
सेवकानां यथा लोके व्यवहारः प्रसिध्यति ॥ ७ ॥
तथा कार्यं समर्प्यैव सर्वेषां ब्रह्मता ततः ।
गंगात्वं सर्वदोषाणां गुणदोषादिवर्णना ॥ ८ ॥
गंगात्वेन निरूप्या स्यात्तद्वदत्रापि चैव हि ॥ ९ ॥

इति श्रीवल्लभाचार्यविरचितं सिद्धांतरहस्यं समाप्तम् ।

१ कार्यमिति पा०. २ गंगात्वे इति पा०.